# संस्कृतवार्ता:

**दिनाङ्क :-16.11.2024**

**प्रात: - 06:55**

**इयम् आकाशवाणी**

**प्रधानमन्त्री – नाइजजीरिया**

**प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य नाइजीरिया-ब्राजील-गुआना-देशानां षड्दिवसीययात्रार्थं गमिष्यति। एतेषां त्रयाणां राष्ट्राणां स्वयात्राया: प्रथमे सोपाने प्रधानमन्त्री नाईजीरिया-देशस्य राष्ट्रपते: बोला-अहमद-टिनूबू इत्येतस्य निमन्त्रणे नाइजीरियां प्रति यास्यति। इयं सप्तदशसु वर्षेषु कस्यापि भारतीय-प्रधानमन्त्रिण: प्रथमा नाइजीरियायात्रा भवेदिति। नाइजीरियादेशे द्विदिवसीय-प्रवासावधौ श्रीमोदी उभयो: देशयो: मध्ये राजनीतिक-सहभागित्वस्य समीक्षाम् अपि च द्विपक्षीय-सम्बन्धान् समेधितुं अवसरेषु विविधेषु चर्चार्थं शीर्ष-नेतृभिस्साकं मन्त्रणां विधास्यति। तत्रासौ भारतीयसमुदायस्य सम्मेलनमेकं सम्बोधयिष्यति। तदनु प्रधानमन्त्री नाइजीरियात: अस्य मासस्य अष्टादश दिनाङ्के राष्ट्रपतिना लुईस-इनासियो-लूला-दा-सिल्वा-इत्यनेन आयोक्ष्यमाणे जी-20 इत्येतस्मिन् शिखरसम्मेलने भाग-ग्रहणाय ब्राजीलदेशस्य रियो-डि-जेनेरिया-नगरं प्रति प्रस्थास्यति। स्वयात्राया: अन्तिमे तृतीयेच चरणे प्रधानमन्त्री नवदशत: एकविंशतिदिनाङ्कं यावत् गुयानायां भविष्यति।**

**प्रधानमन्त्री-बोडोमहोत्सव:**

**प्रधानमन्त्री नरेन्द्रमोदी प्रोदीरितवान् यत् बोडो-शान्ति-सहभागिता न केवलं बोडोसमुदायस्य कृते लाभदायिनी अपि तु अनया सहभागितया अन्यासां शान्तिनां कृते मार्गा: उद्घाटिता: भविष्यन्ति। प्रधानमन्त्री ह्य: नवदिल्ल्यां प्रथमस्य बोडोलैण्डमहोत्सवस्य उद्घाटनं कुर्वन् उक्तवान् यत् शान्ति-सहभागिता-ज्ञापनेन दशसहस्राधिकं युवान: शस्त्राणि अत्यजन् येन् हि असमराज्ये हिंसा अवरुद्धा जाता। एते युवान: समाजस्य मुख्यधारायां प्रविष्टा: अपि अभवन्। केन्द्रप्रशासनेन एतदर्थं बोडोलैण्ड-विकासाय पञ्चशताधिक-एक-सहस्र-कोटि-रूप्यकाणां विशिष्ट: राशि: अपि प्रदत्त:।**

झारखण्डम्

झारखण्डराज्ये एन.डी.ए.-इण्डीसंयुति-दलयोर्मध्ये आरोपप्रत्यारोपस्य प्रक्रिया विधानसभा-निर्वाचनस्य प्रचाराभियानावधौ दृश्यते। ह्य: धनबादनगरस्य टुण्डीक्षेत्रे एकां जनसभां सम्बोधयन् भाजपेतिदलीय: वरिष्ठनेता राजनाथसिंह: हेमन्तसोरेन-नेतृत्वाधायिनि प्रशासने भ्रष्टाचारस्य आरोपं प्रख्यापितवान्। तत्रैव बोकारोक्षेत्रे कांग्रेसदलस्य नेता राहुलगांधी उक्तवान् यत् केवलं संविधानमेव झारखण्डस्य निर्धन-आदिवासि-जनानां हितानां रक्षां कर्तुं शक्नोति इति। ध्यातव्यमस्ति यत् झारखण्ड-विधानसभा-निर्वाचनस्य द्वितीयस्य अन्तिमस्य च चरणस्य महाराष्ट्रे च एकस्मै चरणाय मतदानम् अस्य मासस्यैव विंशतिदिनाङ्के भविष्यति अथ च मतगणना त्रयोविंशतिदिनाङ्के सुनिश्चिता भविष्यति इति।

शाह:-महायुति-अभियानम्

केन्द्रीयगृहमन्त्री अमितशाह: उद्घोषणां कृतवान् यत् वर्धा-नान्देड़-रेल-परियोजना पञ्चवर्षाणाम् आभ्यन्तरे एव पूरयिष्यते। एतदतिरिच्य सिञ्चन-व्यवस्थां सुदृढीकर्तुं पैनगङ्गानदी नदी-सन्धि-परियोजनायां सम्मिलिता स्यादिति। सहैव नागपुर-मुम्बई-समृद्धि-एक्सप्रेसवे इति यवतमाल-जनपदस्य उमरखेडपर्यन्तं सम्वर्धयिष्यते। गृहमन्त्री ह्य: यवतमाल-जनपदे महायुति-प्रत्याशिभ्य: एकं जन-समागमं सम्बोधयन् आसीत्। श्रीशाह: चन्द्रपुरे इतोऽपि एकां जनसभां सम्बोधितवान्।

निगडनम्

स्वापक-नियन्त्रण-विभागेन दिल्ल्यां विहिते बृहत्तमे कार्याचरणे भूयोऽपि नवशत-कोटिरूप्यकाणां कोकेन इति मादक पदार्थस्य भेद: उद्घाटित:। गृहमन्त्रालयेन प्रकटितं यत् निरीक्षणावधौ सूचनेयम् आगता यत् विदेशे निवसतां जनानां एक: समूह: एनं समूहं सञ्चालयति स्म। अधिगत-प्रतिबन्धित-पदार्थानां कामपि मात्रां प्रैष्यमाध्यमेन उतवा कार्गोसेवानां माध्यमेन ऑस्ट्रेलिया देशं प्रति प्रेषयति इति।

क्रिकेटिति

क्रिकेटप्रतिस्पर्धायाम्, भारतेन ह्य: रात्रौ जोहान्सबर्गनगरस्य वान्डरर्स-क्रीडाङ्गणे चतुर्थे अन्तिमे च टी-ट्वेंटी इत्येतस्मिन् अन्ताराष्ट्रिय क्रिकेट द्वन्द्वे दक्षिण-अफ्रीकादलं पञ्चत्रिंशदधिकै-शतं धावनाङ्कै: पराजितम्। अनेन विजयेन साकमेव भारतीयदलं श्रृङ्खलां त्रीणि एकं इत्यनेन अङ्कान्तरालेन स्वनाम्नि कृतवत्।